जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते ।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्[1] ॥ (म. भा. १. ४८४)

ति इति किम् ? अद्यते । किति इति किम् ? [2]अत्तव्यम् ॥

## लुङ्सनोर्घस्लृ । (३७/२४२७)

लुङि सनि च परतो[3]ऽदो घस्लृ आदेशो भवति । [4]लृदित्करणमङर्थम् । [5]लुङि — अघसत्, अघसताम्, अघसन् । सनि — जिघत्सति, जिघत्सतः, जिघत्सन्ति ।

[१६६] घस्लृभावेऽच्युपसङ्ख्यानम् । (म. भा. १. ४८४)
प्रात्ति[6] इति [7]प्रघसः ॥

## घञपोश्च । (३८/३२३६)

घञि अपि च परतः [8]अदो घस्लृ आदेशो भवति । [9]घासः । प्रघसः । 'उपसर्गेऽदः' (३. ३. ५९/ ३२३५) इत्यप् ॥

## बहुलं छन्दसि । (३९/३३९८)

छन्दसि विषये बहुलमदो[10] घस्लृ आदेशो भवति । 'घस्तां नूनम्' (वा.सं. २१. ४३) । 'सग्धिश्च मे' (वा. सं. १८.९) । [11]न च भवति । [12]'आत्तामद्य मध्यतो मेद उद्भृतम्' (वा.सं. २१.४३) । अन्यतरस्यां[13]-ग्रहणमेव कस्मान् न क्रियते, तदेवोत्तरार्थमपि[14] भविष्यति ? कार्यान्तरार्थं बहुलग्रहणम् । घस्ताम् इत्यत्रोपधालोपो न भवति ॥

## लिट्यन्यतरस्याम् । (४०/२४२४)

[15]लिटि परतोऽदोऽन्यतरस्यां [16]घस्लादेशो भवति । जघास, जक्षतुः, जक्षुः । [17]आद, आदतुः, आदुः ॥

## वेञो वयिः । (४१/२४११)

लिट्यन्यतरस्याम् (२.४.४०/२४२४) इति वर्तते । वेञो [18]वयिः आदेशो भवति अन्यतरस्यां लिटि परतः । इकार [19]उच्चारणार्थः । उवाय, ऊयतुः, ऊयुः । पक्षे — [20]ऊवतुः, ऊवुः । 'लिटि वयो यः' (६.१.३८/२४१३) इति यकारस्य सम्प्रसारणं प्रतिषिध्यते । 'वश्चान्यतरस्यां किति' (६. १. ३९/२४१४) इति [21]वकारो विधीयते — ववौ, ववतुः, ववुः । 'वेञः' (६. १. ४०/२४१५) इति सम्प्रसारणं न भवति ॥

---

1. के पुनरन्तरङ्गाः । हित्वा । दत्त्वा । उक्त्वा । त्वदीर्घत्वशूङ्कविटां विधयः । सन्धाय । विहाय । विधाय । प्रदाय । तिपुर्द्दीय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य । प्रपठ्य । अद्यात् । कितीति किम् । अत्ता इत्यधिकम् क. ड. इ. फ. ग. 2. अत्ता क. ड. 3. अदेः क. ह. 4. लित्करणम् ड. 5. लुङि नास्ति क. फ. 6. प्राश्नाति ह. 7. प्राघसः ह. 8. अदेः क. ग. ह. 9. प्रघासः फ. 10. अदेः इ. फ, अदो नास्ति क. 11. इह न भवति क. इ, न भवति ब. ह. 12. अत्तामद्य ड. 13. °ग्रहणमेकस्मात् फ. 14. अपि नास्ति फ. 15. अदेः घस्लादेशो भवति लिटि परतः अन्यतरस्याम् क. 16. घसादेशः ह. 17. इह न भवति इत्यधिकम् ह. 18. वयिरित्ययमादेशः क. 19. उच्चारणार्थम् ग. 20. उवाय इत्यधिकम् क. 21. यवकारौ विधीयेते इ, यकारश्च वकारो क.